ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद् भवेत् ।
पूर्वस्य चेत् सवर्णोऽसावाडाम्भावः[1] प्रसज्यते ॥१॥
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी[2] यदि ।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत् ॥२॥ (म. भा. १.७३)

## दाधा घ्वदाप् । (२०/२३७३)

दारूपाश्चत्वारो धातवः, धारूपौ च द्वौ [3]दाब्दैपौ वर्जयित्वा घुसञ्ज्ञका भवन्ति । 'डुदाञ्'[4] (धा. पा. १०९१)–प्रणिददाति । 'दाण्' (धा. पा. ९३०)–प्रणिदाता । 'दो' (धा. पा. ११४८)–प्रणिद्यति । 'देङ' (धा. पा. ९६२)–प्रणिदयते । 'डुधाञ्' (धा. पा. १०९२)–प्रणिदधाति । [5]'धेट्' (धा.पा. ९०२)–प्रणिधयति वत्सो मातरम् । अदाप् इति किम् ? 'दाप् लवने' (धा.पा. १०५९)–दातं बर्हिः । 'दैप् शोधने' (धा. पा. ९२४)–अवदातं मुखम् । घुप्रदेशाः –[6]'घुमास्थागापाजहातिसां हलि' (६. ४. ६६/२४६२) इत्येवमादयः ॥

## आद्यन्तवदेकस्मिन् । (२१/३४८)

असहायस्य आद्यन्तोपदिष्टानि कार्याणि न सिध्यन्ति इति अयमतिदेश आरभ्यते । [7]सप्तम्यर्थे वतिः । आदाविव अन्ते इव एकस्मिन्नपि कार्यं भवति । यथा कर्तव्यम् इत्यत्र प्रत्ययाद्युदात्तत्वं [8]भवति (३.१.३/३७०८), एवम् औपगवम् इत्यत्रापि यथा स्यात् । यथा वृक्षाभ्याम् इत्यत्र अतोऽङ्गस्य[9] दीर्घत्वम् (७.३.१०२/२०२) एवम् आभ्याम्, इत्यत्रापि [10]यथा स्यात् । एकस्मिन्निति किम्? सभासन्नयने भवः साभासन्नयनः, आकारमाश्रित्य वृद्धसञ्ज्ञा न भवति ॥

## तरप्तमपौ घः । (२२/२००३) ।

तरप् तमप्[11] इत्येतौ प्रत्ययौ घसञ्ज्ञौ भवतः । कुमारितरा । कुमारितमा । ब्राह्मणितरा । [12]ब्राह्मणितमा । घप्रदेशाः––'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः' (६.३.४३/९८५) इत्येवमादयः ॥

## बहुगणवतुडति सङ्ख्या । (२३/९५८)

बहु गण वतु डति (५.२.३९/१८४०) (५.२.४१/१८४२) इत्येते[13] सङ्ख्यासञ्ज्ञा भवन्ति । बहुकृत्वः (५.४.१७/२०८५) । बहुधा (५. ३. ४२/१९८८) । बहुकः[14] (५. १. २२/१६८७) । बहुशः (५. ४. ४३/२११०) । गणकृत्वः । गणधा[15] । गणकः । गणशः[16] । [17]तावत्कृत्वः । तावद्धा । तावत्कः । तावच्छः । कतिकृत्वः । कतिधा । कतिकः । [18]कतिशः ।

बहुगणशब्दयोर्वैपुल्ये सङ्घे च वर्तमानयोरिह ग्रहणं नास्ति, सङ्ख्यावाचिनोरेव[19] । भूर्यादीनां निवृत्त्यर्थं [20]सङ्ख्यासञ्ज्ञा विधीयते ।

---

1. आडागमः ब, आडाभावः ई. 2. दृतिं न शुष्कं सरसी शयानम् (ऋ.७.१०३.२) इत्यधिकम् अ. 3. दाब्दैपौ नास्ति फ. 4. डुदाञ् नास्ति फ.ह. 5. उदाहरणमिदं नास्ति फ. 6. नेर्गदनदपतपदघुमास्था (८.४.१७/२२८५) अ. क.ड. 7. एतन्नास्ति अ. 8. भवति नास्ति फ. 9. अंगात्वे दीर्घत्वं भवति क.ड.फ, अङ्गान्ते ब, अङ्गान्ते एव ह. 10. यथा नास्ति ब. 11. तरप्-तमपौ घसञ्ज्ञौ क.फ. 12. नास्ति फ. 13. प्रत्ययाः इत्यधिकम् अ. 14. नास्ति ह. 15. नास्ति ग. ह. 16. नास्ति फ. 17. यावत्कृत्वः, यावद्धा ह. 18. नास्ति इत्यधिकम् फ. 19. ग्रहणं इत्यधिकम् फ, ग्रहणं तु इत्यधिकम् क. 20. सङ्ख्या नास्ति फ.